# शान्तोऽपि नवमो रसः

HEMARAJA.N.S
RESEARCH ASSISTANT
KARNATAKA SANSKRIT UNIVERSITY
PAMPAMAHAKAVI ROAD, CHAMARAJAPET,
BENGALORE-18
EMAIL- monihemu85@gmail.com
Ph.8310719147

## ✪ काव्यसाहित्यम्–Peotic Literature

"द्वे वर्त्मनी गिरां देव्याः शास्त्रं च कविकर्म च ।

प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम् ॥" [1]

पूर्वोक्तोक्तिवत् सरस्वत्याः प्रत्यक्षे मार्गद्वये प्रतिभोद्भवं काव्यमपि अन्यतमम् । 'कवेः कर्म काव्यम्' इति निष्पन्नं काव्यपदं काव्यानां महासमुद्रमेव प्रतिनिधत्ते । प्रतिभावान् कविरेव काव्यसाम्राज्यस्य चक्रवर्ती । तदुच्यते –

"अपारे काव्यसंसारे कविरेकः प्रजापतिः ।

यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥" [2]

एवं नवनवोन्मेषशालिन्या प्रज्ञया प्रतिभया च प्रभासमानस्य कवेः समृद्धकाव्यगुणभूयिष्ठं काव्यसाहित्यं साहित्यरसिकानां हृदयानि नितान्तं रञ्जयति ।

## ✪ काव्यप्रभेदाः – Types of Poetic Literature

काव्येषु प्रधानतया भेदद्वयं वर्तते दृश्यकाव्यं श्रव्यकाव्यं चेति । तत्र दृष्टुं योग्यं काव्यं दृश्यं काव्यम् इत्युच्यते । दृश्यकाव्ये दशरूपकाणि अष्टादश उपरूपकाणि च अन्तर्भवन्ति ।

---

[1] काव्यमीमांसा–१–६
[2] काव्यमीमांसा–१–१६

दृश्यकाव्यगतानि रूपकाणि तु नाटकं, प्रकरणं, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनम् इति दशधा भिद्यन्ते ।

उपरूपकाणि तु नाटिका, त्रोटकं, गोष्ठी, स कं, नाव्यरासकं, प्रस्थानम्, उल्लाप्यं, काव्यं, प्रेङ्खणं, रासकं, संलापकं, श्रीगदितं, शिल्पकं, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका इति अष्टादशधा विभक्तानि । एवं दृश्यकाव्येषु प्रभेदाः भवन्ति ।

श्रोतुं योग्यं काव्यं श्रव्यं काव्यं भवति । श्रव्यकाव्यमपि पुनः त्रिविधं भवति गद्यकाव्यं, पद्यकाव्यं चम्पूकाव्यं चेति । 'वृत्तगन्धोज्झितं गद्यम्' इति विश्वनाथस्य अभिप्रायः । वृत्तस्य छन्दसः गन्धेन लवेनापि रहितं गद्यम् इति स्पष्टीभवति ।'अपादः पदसन्तानः गद्यमित्यभिधीयते'इत्यनेनापि गद्यस्य लक्षणं निरुच्यते ।

'छन्दोबद्धपदं पद्यम्' इत्यनेन शास्त्रप्रसिद्धलक्षणयुतेन छन्दसा नियन्त्रितं पद्यम् इति अवगम्यते । 'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते' इत्युक्तिः गद्यपद्योभयात्मकं काव्यं चम्पूः इति निश्चिनोति । एवं श्रव्यकाव्ये अपि नाना प्रकाराः निरूप्यन्ते साहित्यमीमांसकैः ।

अस्मिन् पद्यकाव्यप्रकारे स्तोत्रसाहित्यम् अपि अन्तर्गतं विद्यते । संस्कृते स्तोत्रसाहित्यं महत् बृहत् च सत् नानाविषयनिरूपकं जनमानसाह्लादकारि च वर्तते इति पण्डिताः आमनन्ति ।

## ✪ काव्यप्रयोजनम् – Benefits of Poetic Litearature

आनन्दः एव काव्यस्य प्रमुखं प्रयोजनम् इत्यस्मिन् विषये आलङ्कारिकाणाम् एकाभिप्रायः वर्तते । भामहः काव्यप्रयोजनम् एवं निर्वक्ति –

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।

प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम् ॥"[3]

भरतमुनेः नाव्यशास्त्रे 'क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्'इत्युक्तम् ।

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये

[3] काव्यालङ्कारसूत्रवृत्तिः–१–३

सद्यःपरनिर्वृतये कान्तासंमिततयोपदेशयुजे"[4]

इत्यादिवाक्यानि काव्यप्रयोजनानि निश्चप्रचं निगदन्ति ।

✪ **काव्यलक्षणम्** – Features of Poetic Litearature

वागर्थौ अविनाभावसम्बन्धेन बद्धौ इति तु स्पष्टम् । प्राचीनाः आलङ्कारिकाः शब्दार्थयोः उभयोरपि समानं प्राधान्यं दत्वा 'शब्दार्थौ सहितौ काव्यम्' इति काव्यलक्षणम् अङ्गीचक्रुः । भामहः, रुद्रटः, वाग्भटः, मम्मटः, हेमचन्द्रः इत्यादयः शब्दार्थयोः समप्राधान्यपरे वर्गे अन्तर्भवन्ति ।

केचन आलङ्कारिकाः शब्दस्य एव प्राधान्यम् अवोचन् । काव्यादर्शस्य 'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली' रसगङ्गाधरस्य 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इत्यादीनि वाक्यानि शब्दस्य एव प्राधान्यं ददति । कैश्चिल्लाक्षणिकैः रसादिविषयाः प्रधानीकृत्य काव्यलक्षणं न्यरूपि ।

चण्डीदासस्य 'आस्वादजीवातुः पदसन्दर्भः काव्यं' शौद्धोदनेः 'काव्यं रसादिमद्वाक्यं' साहित्यदर्पणकारस्य 'वाक्यं रसात्मकं काव्यम्' इत्यादीनि वाक्यानि रसपरं काव्यलक्षणं निरूपयन्ति ।

✪ **काव्यसम्प्रदायाः** – Lineges of Poetic Litearature

काव्यस्य आत्मनः विषये आलङ्कारिकेषु महान् भिन्नाभिप्रायः वर्तते । अभिप्रायभेदात् सम्प्रदायभेदः आविर्भूतः । अतः विभिन्नाः नैके काव्यसम्प्रदायाः समजायन्त । तेषु रससम्प्रदायः, ध्वनिसम्प्रदायः, गुणसम्प्रदायः, अलङ्कारसम्प्रदायः, रीतिसम्प्रदायः, औचित्यसम्प्रदायः, वक्रोक्तिसम्प्रदायः इत्यादयः प्रमुखाः । भट्टनायकः यद्यपि रससम्प्रदायानुयायी तथापि तस्य विचारसरणिः भिद्यते ।

ध्वनिम् अनुमाने एव अन्तर्भावयितुं यतमानः मयूरभट्टः अनुयायिनाम् अभावात् काञ्चित् नूतनां शाखां स्थापयितुम् असमर्थः अभूत् । 'वक्रोक्तिः काव्यजीवितम्' इति वदतः कुन्तकस्य शाखा अपि न अवर्धत ।

---

[4] नाट्यशास्त्रम्–१–४

रससम्प्रदायस्य मूलं नाट्यशास्त्रम् एव । अभिनवगुप्तः अपि रसं विशेषतया प्रत्यपादयत् । विभावानुभावव्यभिचारिभावेभ्यः प्रतीयमानः रसः आनन्दस्वरूपी । अयमेव रसः 'विगलितवेद्यान्तरः''लोकोत्तरचमत्कारप्राणः''ब्रह्मानन्दसहोदरः''अखण्डस्वप्रकाशानन्दचिन्मयः' इत्यादिभिः विशेषणैः विभूषितः वर्णितश्च । रसस्य आस्वादकः सहृदयः । रसनिष्पत्तिः, रसस्वरूपं, रससङ्ख्या, रसपरिभाषा, रसास्वादनप्रकाराः इत्यादीन् नैकान् रससिद्धान्तसम्बद्धविषयान् अधिकृत्य आलङ्कारिकेषु विद्वत्सु महान् विवादः एव संवृत्तः ।

रससङ्ख्यानिर्णयः अपि रसविवेचनाङ्गतया अत्र आयाति । भरतस्य अपेक्षया प्राचीनः द्रुहिणः अष्टौ रसाः इति निर्णीतवान् इति भरतः इत्थं वर्णयति 'एते ह्यष्टौ रसाः प्रोक्ताः द्रुहिणेन महात्मना' इति । भरतः अपि रसाः अष्टौ एव इति ब्रवीति । किन्तु मम्मटः काव्यप्रकाशे 'शान्तोऽपि नवमो रसः' इति जगाद । आनन्दवर्धनादयः अपि मम्मटमतम् अनुसृत्य नवरसान् अङ्गीचक्रुः । भरतमुनिस्तु आष्टौ स्थायिभावानाम् अष्टौ रसान् विवृणोति ।

'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' [5] इत्यस्मिन् रससूत्रे 'स्थायी' इति शब्दस्य अभावात् 'संयोगः''निष्पत्तिः' इत्युभयोः शब्दयोः अस्पष्टार्थकत्वात् सूत्रमिदं बहुभिः बहुधा व्याख्यातम् ।

एतेषु भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशङ्ककस्य अनुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य व्यक्तिवादः च प्रसिद्धाः । 'वाक्यं रसात्मकं काव्यम्' इति रससम्प्रदायानुसारिणां सिद्धान्तः ।

रसगङ्गाधरे भरतस्य रससूत्रस्य अष्टविधानि व्याख्यानानि प्रदर्शितानि । भामहः, उद्भटः, रुद्रटः, इत्यादयः अलङ्कारसम्प्रदाये अन्तर्भवन्ति । एतेषाम् अभिप्राये रसवदाद्यलङ्कारैःएव रसः गतार्थः भवति । 'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते' इति वाचा अलङ्कारस्य स्वरूपं निश्चीयते । अतः 'काव्यं ग्राह्यमलङ्कारात्' इत्यनेन काव्यस्य ग्राह्याग्राह्यत्वम् अलङ्कारान् एव अवलम्बते इति अलङ्कारसम्प्रदायवादिनः च वदन्ति ।

---

[5] नाट्यशास्त्रम्–५–४

वामनः रीतिसम्प्रदायस्य प्रवर्तकः । सः 'रीतिरात्मा काव्यस्य' इत्युदघोषयत् । 'विशिष्टा पदरचना रीतिः' । विशेषो गुणात्मा । वैदर्भी गौडिया पाञ्चाली इति तिस्रः रीतयः इत्यादिभिः वचोभिः रीतेः स्वरूपं लक्षणं च निरूपितम् ।

कुन्तकस्य वक्रोक्तिजीवितं वक्रोक्तिसम्प्रदायस्य प्रवर्तकम् । कुन्तकः 'विदग्धभङ्गिभणितिरूपा वक्रोक्तिरेव काव्यजीवितम्' इति अवदत् । भामहः अपि वक्रोक्तेः यथोचितं स्थानम् अकल्पयत् । दण्डी एवम् अवोचत् –

"सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।

यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥" [6]

आनन्दवर्धनः ध्वनिसम्प्रदायस्य प्रवर्तकः । 'काव्यस्यात्मा ध्वनिः' इति अस्य मतम् । लक्षणायामेव ध्वनेः अन्तर्भावं निराकृत्य सः काव्यार्थं वाच्यं प्रतीयमानं चेति द्वेधा विभभाज । कवीनां वाणीषु ध्वन्याख्यः प्रतीयमानः अर्थः विराजते इति एवं निरूपयति सः –

"प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।

यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥" [7]

क्षेमेन्द्रः औचित्यसम्प्रदायस्य प्रवर्तकः । 'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्' इत्यनेन औचित्यस्य महत्त्वं ज्ञायते । क्षेमेन्द्रः औचित्यविचारचर्चा इति स्वीये ग्रन्थे औचित्यस्वरूपलक्षणादीन् इत्थं निरूपयितुं प्रारभते –

"औचित्यस्य चमत्कारकारिणश्चारुचर्वणे ।

रसजीवितभूतस्य विचारं कुरुतेऽधुना ॥" [8]

मम्मटः गुणसम्प्रदायस्य प्रतिपादकः । गुणाः रसधर्माः इति अस्य अभिप्रायः । 'ओजः प्रसादः माधुर्यम्' इति गुणत्रयमङ्गीकृत्य गुणानन्यानेतेषु अन्तर्भावयति असौ ।

---

[6] साहित्यदर्पणम्–२–६

[7] ध्वन्यालोकः– १.

[8] साहित्यदर्पणम् –१–१०

‘रसनिष्पत्तिः’ भारतीयकाव्यमीमांसाप्रपञ्चस्य अत्यन्तं महत्त्वपूर्णः एव विषयः वर्तते । रसविवेचनस्य प्रारम्भः रसनिष्पत्त्या एव आरभ्यते इति तु वस्तुस्थितिः । यतः भरतमुनेः ‘विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः’ इति रससूत्रं रसनिष्पत्तिमेव व्याख्याति न तु रसस्वरूपम् । विभावानुभावसञ्चारिभावानां संयोगात् रसनिष्पत्तिः भवति इति अस्य अर्थः ।

रसः नाम कः ? रसः ‘रसः’ इत्येव किमर्थम् अभिधीयते ? इत्यादयः प्रश्नाः समुद्भवन्ति । यः अस्वाद्यः भवति सः एव रसः ।

यथा नानाविधैः व्यञ्जनैः संस्कृतम् अन्नं भुञ्जानाः प्रसन्नमनस्काः मानुषाः रसान् आस्वादयन्ति हर्षादीन् अनुभवन्ति तथैव प्रसन्नचित्ताः प्रेक्षकाः विविधभावैः अभिनयैश्च व्यक्तम् आङ्गिकं सात्विकं च अभिनयभूयिष्ठं स्थायिभावम् आस्वादयन्ति । नाट्यमाध्यमेन एते आस्वाद्याः भवन्ति इति हेतोः एतेषां नाट्यरसाः इति नामधेयम् ।

रसः आस्वादः न किन्तु आस्वाद्यः । रसः न अनुभूतिः परम् अनुभूतिवस्तु । रसः न व्यक्तिनिष्ठः किन्तु वस्तुनिष्ठः । विभावानुभावव्यभिचारिभावभूयिष्ठैः त्रिविधैः अभिनयैः अभिव्यक्तः स्थायिभावः एव रसत्वेन परिणमते । स्थायिभावः एव न रसः किन्तु सः रसस्य आधारः । यतः नाट्यसामग्रीभिः मिलित्वा स्थायिभावः एव रसः भवति ।

रससङ्ख्यानिर्णयः अपि रसविवेचनाङ्गतया अत्र आयाति । भरतस्य अपेक्षया प्राचीनः द्रुहिणः अष्टौ रसाः इति निर्णीतवान् इति भरतः इत्थं वर्णयति ‘एते ह्यष्टौ रसाः प्रोक्ताः द्रुहिणेन महात्मना’ इति । भरतः अपि रसाः अष्टौ एव इति ब्रवीति । किन्तु मम्मटः काव्यप्रकाशे ‘शान्तोऽपि नवमो रसः’ इति जगाद । आनन्दवर्धनादयः अपि मम्मटमतम् अनुसृत्य नवरसान् अङ्गीचक्रुः ।

“जाते जगति वाल्मीकौ कविरित्यभिधाभवत्” “कविरिति ततोव्यासे” [9]इति

श्लोकोक्तप्रकारं वाल्मीकिरामायणप्रभृतीनि अनेकानि दृश्यश्रव्यात्मकानि काव्यानि भासबाणकालिदासेत्यादिभिः कविश्रेष्ठैः रसवन्ति विविधानि काव्यानि प्रणीतानि प्रणीयन्ते च । आदिकाव्ये रामायणे “रसैः श्रुङ्गारकरुणरौद्रवीरभयानकैः” इति श्लोकेन अष्टरसानां उल्लेखे सत्यपि क्रिस्तपूर्व एकशतके जातात् नाव्यशास्त्राख्यस्य ग्रन्थस्य प्रणेतुः भरतमुनेः प्राञ्चः यान् कान् अपि साहित्यशास्त्रीयान् ग्रन्थान् न निजगदुः ।

“शान्तो नाम शमस्थायिभावात्मकः मोक्षप्रवर्तकः विद्यते” [१०]इति

अलङ्कारशास्त्रग्रन्थेषु आद्यस्य नाव्यशास्त्राख्यस्य ग्रन्थस्य प्रणेता भरतनुनिः स्वग्रन्थे प्रथमं अस्य शान्तरसस्य स्वरूपं स्थायिभावनिर्देशपूर्वकं स्फुटीचकार ।

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।

बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाव्येरसाः स्मृताः” इति

अष्टरसान् नाव्यशास्त्रे एकत्र निर्दिश्य अन्यत्र केषुचित् कारिकश्लोकेषु शान्तं नाम अन्यं रसं भरतः प्रत्यपादयत् । शृङ्गारहास्यकरुणादीनां रसानां रतिहासशोकादयः स्थायित्वभाजः सन्तः अपि शान्तस्थायी शमः रतिहासादीनां सर्वेषां स्थायिनां स्थायी इति धिया

स्वं स्वं निमित्तमासाद्य शान्तात् भावः प्रवर्तते,

पुनर्निमित्तापाये च शान्ते एव उपलीयते इति [११]

भरतः आचख्ये । काव्यालङ्कारकारः नवमशतकीयः रुद्रटः तस्मिन् एव शतके जातः वाग्भटालङ्कारकारः वाग्भटश्च सम्यज्ञानं शान्तस्य स्थायिनं आचक्षे । नवमशतकस्य पूर्वार्धे जातः अभिनवगुप्तस्य गुरुः भट्ट्तौतः शान्तं अङ्गीचकार । तस्मिन् एव काले जातः ध्वन्यालोककारः आनन्दवर्धनः दृश्ये श्रव्ये च काव्ये शान्तं उररीकुर्वन् महाभारतं शान्तप्रधानमिति ऊचे । नाव्यशास्त्रस्य अभिनवभारतीव्याख्याने ध्वन्यालोकस्य लोचने व्याख्याने च रसेषु शान्तः अग्रगण्यः इति परमतदूषणपूर्वकं प्रत्यपादयत् । अश्वघोषस्य सौन्दरनन्दः बुद्धचरितं शारिपुत्रप्रकरणं श्री हर्षस्य

---

[9] काव्यमीमांसा १. ५

[10] नाव्यशास्त्रम् १.३

[11] नाव्यशास्त्रम् १. ८

नागानन्दश्चेत्यादयः अनेके ग्रन्थाः शान्तरसप्रधानाः विद्यन्ते । जीवस्य परमात्मनि अवस्थानात् जन्यं सुखं शमः विद्यते , तादृशं स्थायिनं मोक्षप्रवर्तकं शान्तं काव्ये विशेषतः दृश्ये काव्ये निरूपयितुं न शक्यते इति दशमशतकस्थः दशरूपककारः धनञ्जयः दशरूपकस्य व्याख्याकारः धनञ्जयानुजः धनिकः तदनुयायिनः अन्ये च आलङ्कारिकाः अङ्गीचक्रिरे । दृश्यश्रव्यात्मकेभ्यः बहुभ्यः काव्येभ्यः अनुभूयमानः शान्तः दुरपपन्नः वर्तते । शान्तं विहाय श्रृङ्गारादीनां रसानां स्थायिविषये आलङ्कारिकेषु मतभेदः न दृष्यते । परन्तु काव्ये शान्तं अङ्गीकुर्वत्सु काव्यमीमांसकेषु शान्तस्य स्थायिविषये ऐकमत्यं न विद्यते । भरतमुनिः शान्तोनाम शमस्थायिभावात्मकः मोक्षप्रवर्तकः इति नाव्यशास्त्रस्य षष्टाध्याये शान्तस्य शमं स्थायिनं प्रतिपादयन् “रतिर्हासश्चशोकश्चक्रोधोत्साहो भयम् तथा जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः”[12] इति अष्टस्थायिनः निजगाद । अष्टस्थायिभिः श्रुङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुतसञ्जौ चेत्याष्टौ नाव्ये रसाः स्मृताः [१३]॥ इति यथाक्रमं अष्टरसान् दृष्यकाव्येषु विद्यन्ते इति प्रतिपादनेन दृष्ये अष्टरसाः वर्तन्ते अपि च दृष्यात् अन्यस्मिन् श्रव्यकाव्ये शान्तः विद्यते इति अस्य भरतस्य आशयः स्यात् । अग्निपुराणे, साहित्यदर्पणे च भरतोक्तं शममेव शान्तस्य स्थायिनं इति प्रतिपाद्यते । मम्मटस्य काव्यप्रकाशे, जयदेवस्य चन्द्रालोके जगन्नाथस्य रसगङ्गाधरे च निर्वेदः शान्तस्थायी इति प्रति पाद्यते एकादशतमशतकस्य उत्तरार्धे जीवितः मम्मटः भरतोक्तानुपूर्व्यां एव स्थायिनः तत्समनन्तरं व्यभिचारिणः च भावान् स्वप्रणीते काव्यप्रकाशे व्याचख्ये,

तद्यथा ।–

“जुगुप्साविस्मयश्चेति स्थायिभावाः प्रकीर्तिताः” निर्वेदग्लानिशङ्काख्येति त्रयस्त्रिंशत् व्यभिचारिणः प्रोक्ताः । निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः इति आचचक्षे ।

भरतेन अमङ्गलबोधकस्य निर्वेदस्य व्यभिचारिषु आदौ कथनस्य निर्वेदं स्थायिषु अन्यतमाभिधानप्रयोजनं विद्यते । नो चेत् मङ्गलाकांक्षी भरतः अमङ्गलाभिधायिनं निर्वेदं स्थायिनः कथनानन्तरं सञ्चारिणः आरम्भे नाचक्षीत “शान्तोनाम शमस्थायिभावात्मकः मोक्षप्रवर्तकः”[14] इति भरतोक्तिस्तु प्रक्षिप्तैव स्यात् । अतः निर्वेदस्य शान्तस्य स्थायित्वं भरतमुनिं सम्मतं अपि च आपदीर्ष्यादिजन्यनिर्वेदः व्यभिचारिषु अन्यतमः, तत्वज्ञानजन्यः निर्वेदश्च शान्तस्थायीति

---

[12] नाव्यशास्त्रम्–२–४
[13] नाव्यशास्त्रम्–२–८
[14] नाव्यशास्त्रम्–३–४

निर्वेदद्वैविध्यं वर्तते । तत्र आद्यः शान्तस्थायी अपरस्य सञ्चारिषु अन्यतमः इति विषयविभागः सोदाहरणं मम्मटेन प्रतिपादितः । चतुर्दशशतक्रिस्तवत्सरस्य अन्तिमे चरणे जातः साहित्यदर्पणकारः विश्वनाथः "निरीहावस्थायां स्वात्मविश्रामजसुखं शमः" [१५] शमस्थायिभावः शान्तः रसः इत्याह । निस्पृहदशायां जीवस्य परमात्मनि अवस्थानात् जन्यं सुखं शमपदार्थः वर्तते । दशमशतके विद्यमानाः भट्टतौताभिनवगुप्ताः काव्ये शान्तस्य प्राधान्यां सम्यक् सोदाहरणं प्रतिपादितवन्तः । परन्तु तस्मिन् एव शतके जातः दशरूपककारः धनञ्जयः दशरूपकस्य वृत्तिकारः धनञ्जयानुजः धनिकश्च शान्तं निराकुरुतः । व्यञ्जनवृत्तिं अनङ्गीकुर्वाणौ स्वाभ्यां अङ्गीकृतान् अष्टरसान् अपि तात्पर्यवृत्तिवेद्यान् इति उररीकुर्वन्तौ इमौ सहोदरौ उभयत्र काव्ये शान्तं नाङ्गीकुरुतः । धनञ्जयः शमं निर्वेदं सम्यज्ञानं वा नवमं स्थायिनं निराकरोति, केचित् शमं अपि काव्ये स्थायिनम् आहुः एतस्य पुष्टिः नाट्येषु न भवेत् इति वदन् सर्वत्र निराकरोति । शान्तरसं प्रति धनञ्जयधनिकादीनां विप्रतिपत्तयः अनेकधा विद्यन्ते । भरतेन शान्तस्य विभावानुभावव्यभिचारिणः न निरूपिताः । रागद्वेषादीनां अभावः शमः, तादृशम् अनादिकालप्रवाहायातरागद्वेषादीनां उच्छेदो अशक्यश्च अतः शान्तः नाङ्गीकार्यः । केचन नागानन्दबुद्धचरितमहाभारतादिषु लक्ष्यग्रन्थेषु शान्तरसः प्राधान्यं एति । एवञ्च लक्ष्यग्रन्थेषु दृश्यमानं शान्तं उत तत्स्थायिनं लक्षणग्रन्थेषु निराकरणं न युज्यते शमः निर्वेदः अन्यः कश्चन भावः स्थायी स्यात् तेन पुष्टस्य शान्तस्य लक्षणकरणं अवश्यं विद्यते चेत् नागानन्दे बुद्धचरिते च दयावीरः वर्तते । अन्येषु शान्तरसकाव्यानि इति उच्यमानेषु काव्येषु शान्तेतरे रसाः एव प्रतिपाद्यन्ते । "विरुद्धैः अविरुद्धैर्वा भावैः विच्छिद्यते नयः" [१६]इत्युक्तप्रकारं स्थायिस्वरूपं शमे उत निर्वेदे न सङ्गच्छते । अनेनैव आशयेन धनञ्जयः निर्वेदः निर्वेदादि अतादूप्यात् अस्थायी स्वदते कथम् । वैरस्याय एव तत्पोषः तेन अष्टौ स्थायिनः मताः इति शान्तविषये स्वाकूतं व्यनक्ति । निर्वेदात् तत्वज्ञानं जायते तत्वज्ञानात् अपवर्गः लभते, नतु मम्मटोक्तप्रकारः तत्वज्ञानजन्यः निर्वेदः न विद्यते । अतः निर्वेदः शान्तस्थायी न शक्यते । " शान्तोनाम शमस्थायिभावात्मकः मोक्षप्रवर्तकः"[17] इत्यादि भरतमुनि वचनेषु प्रामाण्यम् अङ्गीकुर्वन्तः आनन्दवर्धनभट्टतौताभिनवगुप्तादयः अर्वाचीनाः सर्वे शान्तं उभयत्र काव्ये अङ्गीकुर्वन्ति । तस्य अशेषवस्तुनिस्सारतादिना आलम्बनेन विभावेन पुण्याश्रमादिना उद्दीपनेन विभावेन रोमाञ्चादिना अनुभावेन हर्षस्मरणादिना सञ्चारिणा च शमः शान्तात्मतस्य आस्वाद्यते इति विश्वनाथस्य आशयः । सप्तदशशतकीयः रसगङ्गाधरकारः जगन्नाथः

[15] साहित्यदर्पणम्–४–६

[16] दशरूपकम् –२– ६

[17] नाट्यशास्त्रम् –४–६

निर्वेदस्थायिनं शान्तं सोदाहरणं प्रत्यपादयत् । नवमो रसः' इति जगाद । आनन्दवर्धनादयः अपि मम्मटमतम् अनुसृत्य नवरसान् अङ्गीचक्रुः ।

एवञ्च शान्तो नाम शमस्थायिभावात्मकः शान्तरसः इति शमस्थायिनं शान्तरसं अनेके आलङ्कारिकाः स्वस्वमत्यानुसारं अङ्गीचक्रुः ।

## आकरग्रन्थाः


१. काव्यप्रकाशः,लेखकः मम्मटः, सम्पादकः श्री श्यामचरणः, द्वितीयं संस्करणम्, पि. एम्. न्यूर् भवन क्रौन् संस्था, पुणे – १९८८

२. नाव्यशास्त्रम्, केखकः भरतमुनिः, सम्पादकः बादूलाल् शुक्लशास्त्री, प्रकाशकः चौकम्बा संस्कृत संस्थानम्, तृतीयं संस्करणम्, वाराणसी – २०१४

३. साहित्यदर्पणः,लेखकः विश्वनाथः, प्रकाशकः भारतीय बुक् कार्पोरेशन्, नई दिल्ली – १९८५

४. दशरूपकम्, लेखकः धनञ्जयः, सम्पादकः प्रो. रामजी उपाध्यायः, प्रकाशकः भारतीयविद्या संस्थानम्, वाराणसी – १९८०

५. काव्यमीमांसा, लेखकः राजशेखरः, सम्पादकः आर्. ए. शास्त्री, प्रकाशकः बरोडा सेण्ट्रल् यूनिवर्सिटि, बरोडा – १९२४

६. ध्वन्यालोकः, लेखकः आनन्दवर्धनः, लोचन–बालप्रिय–दिव्याञ्जनादिव्याख्यासहितः, सम्पादकः जयकृष्णदासः–हरिदासगुप्तः, प्रकाशकः चौकम्बा संस्कृत सीरीज् आफीस्, बनारस् – १९८५